# Shri Hayavadana Stotram

# શ્રીહયવદનસ્તોત્રમ્

## Document Information

Text title : Shri Hayavadana Stotram

File name : hayavadanastotram.itx

Category : vishhnu, stotra

Location : doc_vishhnu

Author : jaggu vakuLabhUShaNakavi

Transliterated by : Chandrasekhar Karumuri

Proofread by : Chandrasekhar Karumuri

Latest update : September 19, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 20, 2023

*sanskritdocuments.org*

# શ્રીહયવદનસ્તોત્રમ્

જ્ઞાનાનન્દમયં દેવં નિર્મલસ્ફટિકાકૃતિમ્ ।
આધારં સર્વવિદ્યાનાં હયગ્રીવમુપાસ્મહે ॥ ૧॥

હયાનનમુપાસ્મહે સ્ફટિકનિર્મલાઙ્ગં સ્ફુટે
સિતામ્બુરુહવિષ્ટરે સમુપવિષ્ટમબ્જાલયમ્ ।
પ્રસન્નકમલાલયાકલિતમઞ્જુલાઙ્કં ત્રયી-
શિરશ્ચિકુરભૂષણં કૃતનતાઘસંશોષણમ્ ॥ ૨॥

તવાક્ષિયુગળં સ્ફુરત્પૃથુલતારકં સાદરં
નિપાતય કૃપામ્બુધે! મયિ ચ પાપકૂપસ્થિતે ।
યદુદ્ધરતિ બાલિશં નવમિવાચરન્ માનવં
બૃહસ્પતિસમં જગત્ પ્રથિતકીર્તિમીડ્યં પ્રભો! ॥ ૩॥

હયાસ્ય! તવ ચન્દ્રિકાધવળકાયકાન્તિચ્છટા
મદીયહૃદયાવૃતપ્રસૃતતામસં સામ્પ્રતમ્ ।
સુદૂરમુપસાર્ય તદ્વિમલબોધપીયૂષતો
નિવારયતુ મે ચિરાદુપનતાં ભવાબ્ધિપ્લુતિમ્ ॥ ૪॥

કદાપિ હયકન્ધર! ત્વદમલાઙ્ઘ્રિપઙ્કેરુહ-
દ્વયસ્મરણમપ્યહો! ન કૃતવાન્ વિમૂઢાત્મકઃ ।
ત્વદઙ્કતલસંસ્થિતાં કુવલનીલલોલેક્ષણાં
વિલોક્ય કમલાં તથાઽપ્યહમિહાસ્મિ નિસ્સાધ્વસઃ ॥ ૫॥

વિધૂસ્રશુચિકેસર પ્રકટફાલપુણ્ડ્રં કરૈઃ
ચતુર્ભિરપિ પુસ્તકં ધવળશઙ્ખચક્રે તથા ।
દધાનમુપદેશદપ્રયતમુદ્રિકાં વાક્પતિં
સ્મરામિ હયકન્ધરં કમલયાસમં ભાસુરમ્ ॥ ૬॥

કિરીટમણિમાલિકારુચિરતૃકેયૂરક-

ક્વણત્ કનકકઙ્કણ પ્રમુખભૂષણાલઙ્કૃતઃ ।
સુધાંશુરુચિરામ્બરઃ શ્રિતજનાર્તિહર્તા પ્રભુઃ
મમાપિ દુરિદં દ્રુતં હરતુ વાજિરમ્યાસનઃ ॥ ૭॥

હયાનન! ભવત્પદદ્વયપયોજપીયૂષજં
સમુદ્ધર વિધાય માં યદિહ તે શુભંયૂન્ ગુણાન્ ।
ચતુર્મુખશતક્રતુ પ્રમુખદેવબૃન્દસ્તુતાન્
ભવેયમહમાદરા દ્વિદિતુમેષ શક્તઃ પ્રભો! ॥ ૮॥

કટાક્ષલવપાત્રતાં તવ ગતાશ્ચ યે ચેતનાઃ
ચતુર્મુખસતીબૃહસ્પતિગણાધિપાસ્તેઽભવન્ ।
સમસ્તજનતાક્ષિતૌ સકલભવ્યવિદ્યાસ્પદે
સમર્ચતિ કૃતાઞ્જલિઃ નુતિશતેન તાન્ વાક્કૃતે! ॥ ૯॥

પયોનિધિસુતાસ્મરન્મુખનિશાપતેઃ કૌમુદી
વિવર્ધિતવળક્ષતારુચિરદિવ્યદેહો હરે! ।
મદીયમપિ માનસં દુરિતતામસૈઃ વ્યાપૃતં
હયાનન! દયામ્બુધે! ધવળયાશુ કારુણ્યતઃ ॥ ૧૦॥

તતસ્તવ પદામ્બુજદ્વયમપિ પ્રમોદાત્ સ્થિરં
નિધાતુમપિ મે ક્ષમં હૃદયપુણ્ડરીકં ભવેત્ ।
અહં ચ હયકન્ધર! ત્વદતિમાર્દવાઙ્ઘ્રિદ્વયં
નિતાન્તદૃઢમાનસઃ પ્રમુદિતો ભવેયં સ્મરન્ ॥ ૧૧॥

શ્રુતિર્હિ તવ સદ્ગુણાન્ ગદિતુમુત્સુકા સાદરં
સ્યવર્તત ગુણોદધે રનવસાદ્ય પારં ચિરાત્ ।
યથોચિતમતિર્બત ! પ્રથિતવૈભવં નિર્ભયો
ભવન્તમિહ નિસ્ત્રપઃ ક્રમધુતઃ સ્તુવન્ સંશ્રયે ॥ ૧૨॥

અહં ત્વમમતામતિઃ ચિરતરાનુવૃત્તા મમ
શ્રુતિસ્મૃતિપુરાણવાચ્છ્રવણતોઽપિ નો નિસ્સરેત્ ।
અતશ્ચ ભવસાગરે પતિતવાનહં દુઃખિતઃ
વિનાશય હયાનન! પ્રતિભટાં તુ તાં વીક્ષણાત્ ॥ ૧૩॥

શ્રુતીરિતપથે કથઞ્ચિદપિ ગચ્છતો મે ભવેત્
પ્રમાદવશતઃ ક્વચિત્ સ્ખલિનમાત્મપાતપ્રદમ્ ।
કથં દુરિતાકરઃ પ્રકૃતિપાશબદ્ધાત્મકઃ

સતાં ગતિમવાપ્નુયાં ભવદનુગ્રહં તં વિના ॥ ૧૪॥

હયાનન! તવાનઘા શ્રુતિમયી તુ હેષાજુષા
મશેષમઘસઙ્ઘમપ્યપનુદત્યનર્ઘા કલાઃ ।
ઉદઞ્ચયતિ કીર્તિમપ્યખિલલોકમાન્યત્વમ-
પ્યતઃ શ્રુતિપથેમમાપ્યટતુ સા પ્રમોદાવહા ॥ ૧૫॥

કરદ્વયસમુદ્ધૃત પ્રથિતશઙ્ખચક્રો ભવાન્
વિશાલવિશદસ્ફુટસ્ફટિકકાન્તિર્હરે!।
વિભાતિ શરદમ્બુદો દલિતતૂલ શુભ્રદ્યુતિઃ
નિજાઞ્ચલસમુદ્ગતદ્યુતિમદિન્દુભાસ્વાનિવ ॥ ૧૬॥

મમ હૃદિ સતતં હયાનન! ત્વં નિવસ યથા હૃદયં શુચિત્વમીયાત્ ।
અકલુષમતિદાયિનં ભવન્તં હૃદિ કલયેયમહં યથા ચ ભક્ત્યા ॥ ૧૭॥

દેહિ મે નાથ વાક્છુદ્ધિં રસવદ્વાગ્વિજૃમ્ભણમ્ ।
આયુરારોગ્યમૈશ્વર્યં નમસ્તે હયકન્ધર!॥ ૧૮॥

જ્ઞાનાભિવૃદ્ધિસમ્પ્રાપ્ત્યૈ હયાનનનુતિસ્રજમ્ ।
વ્યધાત્તસ્ય પદદ્વન્દ્વે જગ્ગૂ વકુળભૂષણઃ ॥ ૧૯॥

ઇતિ શ્રી જગ્ગુ વકુળભૂષણકવિકૃતં શ્રીહયવદનસ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by Chandrasekhar Kurumuri

*Shri Hayavadana Stotram*

pdf was typeset on September 20, 2023

Please send corrections to *sanskrit@cheerful.com*